International Journal of Sanskrit Research 2020; 6(1): 223-225

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2020; 6(1): 223-225
© 2020 IJSR
www.anantaajournal.com
Received: 16-10-2019
Accepted: 05-12-2019

**डॉ. ललित कुमार झा**
सहायक प्राध्यापक, बी.एड. प्रभागः,
फारबिसगंज कॉलेज, फारबिसगंज,
अररिया, बिहार

**Corresponding Author:**
**डॉ. ललित कुमार झा**
सहायक प्राध्यापक, बी.एड. प्रभागः,
फारबिसगंज कॉलेज, फारबिसगंज,
अररिया, बिहार

# संस्कृतवाङ्मये नैतिकशिक्षायाः महत्त्वम्

**डॉ. ललित कुमार झा**

**प्रस्तावना**

विदितमेव समैरपि यदखिलेऽस्मिन् जगति ब्रह्मणः प्रपञ्चे सर्वश्रेष्ठा कृतिर्मानवः मन्यते। अस्याश्च श्रेष्ठकृतेरुद्धार्थं विधिः लोकाय विविधज्ञानविज्ञानसमन्वितां संस्कृतेः आधारभूतां कर्त्तव्याकर्त्तव्यबोधिकां शुभाशुभनिदर्शिकां जीवनस्योन्नायिकां विश्वहित– सम्पादिकाम् आचारसंचारिकां सुखशान्तिसाधिकां ज्ञानलोकप्रसारिकां चतुर्वर्गावाप्तिसोपान– स्वरूपां संस्कृतवाङ्मयराशिं प्रददौ।

संस्कृतवाङ्मयेऽस्मिन् प्रत्येकपदं नैतिकमस्ति। संस्कृतभाषेयं नैतिकशिक्षापरिपूर्णा अस्ति। प्राचीनानाम् ऋषीणां महर्षीणां कवीनां तत्त्वज्ञानां च अनारतश्रमस्यैव फलमेतद् यदीदृशं विपुलं नैतिकशिक्षापरिपूर्णं संस्कृतवाङ्मयम् अस्माकं सविधे वर्तते।

नैतिकशिक्षा नाम किमिति चेत् नीतियुता (सदाचारव्यवहारादीनाम्) शिक्षा एव नैतिकशिक्षा इति कथ्यते। तद्यथा नैतिकशिक्षां परिभाषयति [1]

तस्मिन् देशे य आचारः पारम्पर्यक्रमागतः।
वर्णानां सान्तरालानां स सदाचार उच्यते।।

अर्थात् यस्मिन् देशे यः आचारः सान्तरालानां वर्णानां परम्परया क्रमेण च आगतः स सदाचारः नैतिको व्यवहारो वा कथ्यते। नैतिकशिक्षा किमर्थमावश्यकीति चेत् [2]

नैतिकता एव जीवनम् अनैतिकता तु मरणम्।

नैतिकता नाम एतादृशी भावना तथा एतादृशचिन्तनव्यवहारयोर्नाम यत्र

1. मनुष्यः स्वात्मना सह बाह्यप्रपञ्चस्य (नानाविधा सृष्टिः) तादात्म्यं स्थापनकर्तुं शक्नुयात्।
2. मनुष्येषु परस्परं भयसन्देहभावानामुन्मूलनम्।
3. मनुष्येषु परस्परं विश्वास–आस्था–सहयोग–सम्मानादीनां स्थितिः।

अधुना प्रश्नः समुदेति यत् नैतिकशिक्षया परिपूर्णमिदं संस्कृतवाङ्मयं कथं राष्ट्रनिर्माणे सहायकं भवेदिति चेत्

सुशिक्षितसमाजनिर्माणार्थम्

व्यक्तेः बौद्धिकं चरित्रसम्बन्धिनिर्माणं च भूरिशः शिक्षाप्रणाल्यारुपरि निर्भरं भवति। समाजे यादृशाः मानवाः भवन्ति तादृशः समाजः सञ्जायते। कस्यचित् देशस्य उत्थानं पतनं च तद्देशस्य शिक्षयैव सञ्जायते। अतः सुशिक्षया एव सुसभ्यसमाजस्य निर्माणं भवितुमर्हति। सा शिक्षा कीदृशी स्यादिति चेत् [4]

सत्याचारविचारशिक्षणपरा सर्वाङ्गिकीमुन्नतिम्,
छात्राणां विदधद् विवेकविनयाचारप्रचारैकधीः।
चारित्र्योन्नतिसाधिका गुणगणैः सारल्यसंसाधिका,
लोकेषु प्रचरेत् सुशिष्यजनिदा शिक्षा सदा कामुधुक्।।
अज्ञानान्धतमः प्रणोदप्रवणा लोकोपकृत्येदृका,
पाषाण्डादिनिवारणैकमतिदा मोदावहा मानिनाम्।
सद्वृत्तेन विवर्धिताखिलगुणा या शस्यते ज्ञानिषु,
या देहात्ममनोविकासरुचिरा शिक्षाऽस्तु सा श्रेसये।।

**सदाचारपालनार्थम्**

अद्यत्वे समाजे नैकविधाः समस्याः दरीदृश्यमानाः वर्तन्ते। उदाहरणार्थं यथा भ्रष्टाचारः, महिलानामुत्पीडनम्, व्यसनेनग्रस्ताः युवानः, अवसादेन ग्रस्ताः जनाः इत्यादि। एतासां सर्वासामपि समस्यानां समाधानं नैतिकशिक्षया कर्तुं शक्यते। यथा [4]

1. आचारः परमो धर्मः।
2. सदाचारः सर्वोत्तमं तपः।
3. 'वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च।
4. अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः।। [5]

**एवञ्च [6]**

सत्यं वद। धर्मं चर। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्।

**व्यावहारिकीशिक्षार्थम्**

संस्कृतवाङ्मये पदे–पदे व्यवहारस्य शिक्षा लभ्यते। नैतिकशिक्षापरिपूर्णे संस्कृतवाङ्मयेऽस्मिन् कथं केन सह कीदृशः व्यवहारः कर्त्तव्यः इति सर्वं विवृत्तमस्ति। उदाहरणार्थं यथा– परेषां ये दारा श्वन्ति (अत्र दारा इति पदेन केवलं पत्नी एव न ग्राह्या अपितु माता, दुहितादि अपि ग्राह्या) ताः मातृवत् पश्येत् नरः। तद्यथोक्तम् [7]

मातृवत् परदारेषु परद्रव्येषु लोष्ठवत्।
आत्मवत् सर्वभूतेषु यः पश्यति सः पण्डितः।।

कविकुलललामभूतः कविताकामिनीकान्तः कालिदासः स्वकीये अभिज्ञानशाकुन्तले व्यावहारिकीशिक्षामेवं वर्णयति [8]

शुश्रूषस्व गुरून् कुरु प्रियसखी वृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः।।

अत्र पतिगृहं गच्छन्ती शकुन्तला विदितवेदितव्येन धर्मशास्त्रलोकव्यवहारनिपुणेन पित्रा महर्षिणा कण्वेन उपदिश्यते यत्– श्वश्रूश्वसरादिगुरुजनान् शुश्रूषस्व सपत्नीसमूहे प्रियसखीवद् व्यवहारं विधेहि, अवमानितापि क्रोधेन स्वामिनः विरुद्धं न गच्छ अर्थात् प्रतिकूलवर्त्तिनी मा भव, सेवकवृन्दे अतिशयने अनुकूला भव, निजसौभाग्येषु अगर्विता भव, अनेन प्रकारेण युवतयः गृहिणीस्थानं लभन्ते। विपरीताचरणवत्यः युवतयः पितृश्वसुरवंशस्य सन्तापजनिकाः भवन्तीति।

**सर्वेषां माङ्गलिकीकामनार्थम्**

संस्कृतवाङमये न केवलमेकस्य जनस्य कृते अपितु सम्पूर्णब्रह्माण्डस्य कृते माङ्गलिकी कामना वर्तते। तद्यथा [9]

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामया।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्।।

**अपि च [10]**

यस्तु सर्वाणि भूतानि भूतान्यात्मन्नेवानुपश्यति।
सर्वभूतेषु चात्मानं ततो न विचिकित्सति।।
यस्मिन्सर्वाणि भूतान्यात्मैवाभूद् विजानतः।
तत्र को मोहः कः शोकः एकत्वमनुपश्यतः।।

**राष्ट्रियभावनाप्रेरणार्थम्**

राष्ट्रियभावना मानवानां सर्वोत्कृष्टं कर्तव्यमस्ति। प्रत्येकऽस्मिन् मनुष्ये इयं राष्ट्रभक्तिः, राष्ट्रस्नेहः अवश्यम्भावी। राष्ट्रिया भावना एव तादृशीभावना या जनान् स्वदेशनिर्माणार्थं स्वराष्ट्रोन्नत्यर्थं च सर्वथा सर्वदा च प्रेरयति। राष्ट्रभावनेयं प्राचीनकालादेव अस्माकं संस्कृतवाङ्मये दरीदृश्यते। तद्यथा–

"अहं राष्ट्री सङ्गमनी वसूनाम्"। [11]
"वयं राष्ट्रे जागृयाम पुरोहिता"। [12]
"माता भूमिः पुत्रोऽहं पृथिव्याः"। [13]
अपि स्वर्णमयी लङ्का न मे लक्ष्मण रोचते।
जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।। [14]
न यत्र देशोद्धृतिकामनाऽऽस्ते, न मातृभूमेर्हितचिन्तनं च।
न राष्ट्ररक्षाबलिदानभावः श्मशानतुल्यं नरजीवनं तत्।।
एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं–स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः।। [15]

**विश्वबन्धुत्वभावनार्थम्**

अस्माकम् ऋषिभिर्महर्षिभिश्च एतदेवोदीरितं यत् सर्वभूतहितसाधनम् अस्माकं लक्ष्यं वर्तते। अस्माकं वेदेषु यज्ञप्रक्रियायाः एतदेव महत्त्वं वर्तते यत् स्वाहा (स्व–आ–हा) स्वार्थस्य सर्वथा परित्यागः। तद्यथोक्तम्

अयं निजः परो वेति गणना लघुचेतसाम्।
उदारचरितानां तु वसुधैव कुटुम्बकम्।। [16]
सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम्।
समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम्।
समानं मन्त्रमभिमन्त्रये वः समानेन वा हविषा जुहोमि।
समानी व आकूतिः समाना हृदयानि वः।
समानमस्तु वो मनो यथा वः सुसहाति।। [17]

**एकत्वाखण्डत्वभावनाप्रेरणार्थम्**

संस्कृतवाङ्मयं सर्वथा सर्वदा च अखण्डभारतस्य समर्थनं करोतीति। अस्माकं भारतस्य कीदृशं स्वरूपं कियत् पर्यन्तं विस्तृतमिति सर्वमपि वाङ्मयेऽस्मिन् निगदितं वर्तते। तद्यथा

उत्तरं यत् समुद्रस्य हमाद्रेश्चैव दक्षिणम्।
वर्षं तद् भारतं नाम भारती यत्र संततिः।। [18]
उत्तरं यत्समुद्रस्य, हिमवद्दक्षिणं च यत्।
वर्षं तद् भारतं नाम यत्रेयं भारती प्रजा।। [19]
आसमुद्रात्तु वै पूर्वादासमुद्रात्तु पश्चिमात्।
तयोरेवान्तरं गिर्योरार्यावर्तं विदुर्बुधाः।। [20]
हिमालयात् समारभ्य यावत् इन्दुसरोवरम्।
तं देवनिर्मितं देशं हिन्दुस्थानं प्रचक्षते।। [21]

अस्यां भाषायां सः निधिः वर्तते येन निधिना अस्माकं देशस्य रक्षा एव न भवति अपितु सम्पूर्णायाः मानवतायाः रक्षा समीहते। भारतीयः आदर्शः विश्वबन्धुत्वस्य आदर्शः, मानवसेवायाः आदर्शः, धर्मरक्षणस्य आदर्शः च अस्यां भाषायां वर्तते। संस्कृतभाषया मानवानां हृदये सद्भावप्रतिष्ठा भवति तया सद्भावप्रतिष्ठया लोकस्य रक्षणं भविष्यति। भ्रष्टाचारस्य उन्मूलनं, कदाचारस्य अपाकरणं, दुराचारस्य निराकरणं भविष्यति। विज्ञायते एव सर्वैः विश्वस्य अनेकेषु देशेषु संघर्षस्थितिः वर्तते, संघर्षस्थितिः अत एव वर्तते यतः ते धर्मविचारविरुद्धाः धर्महीनाः सन्ति। अस्माकमत्र साम्प्रदायिकधर्मविषये नायमभिप्रायः वर्तते, हिन्दु–इस्लाम– क्रिश्चनविषये परन्तु भगवता मनुना धर्मस्य लक्षणं यथा उक्तं तथा सर्वैः अङ्गीक्रियते चेत्तर्हि समेषां कल्याणं भवितुमर्हति। तदित्थं वर्तते [22]

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।
धीर्विद्यासत्यमक्रोधो दशकं धर्मलक्षणम्।।

इमे शाश्वतधर्माः विश्वधर्माः मानवताधर्माः न केवलं मानवानां भारतीयानां हिन्दूनां सनातनधर्माणां सनातनधर्मानुयायिनां वा कृते

अपितु समेषां मानवानां कृते वर्तन्ते। अतः यदि व्यापकदृष्ट्या धर्मतत्वस्य संरक्षणं भवेत् तदा सर्वत्र कदाचार–दुराचार–भ्रष्टाचाराणाम् अपाकरणमपि अवश्यमेव भविष्यति। नास्ति तत्र काचित् शंका। तस्य च साधनं संस्कृतविद्यैव वर्तते। संस्कृतवाङ्मये वैज्ञानिकी, लौकिकी, आधुनिकी अपि सामग्री वर्तते। तत्र समेषां मानवानां कल्याणायापि सामग्री वर्तते।

एवं रीत्या संस्कृतवाङ्मये सद्विद्यया विद्यमानैः सदुपदेशैः सर्वो जनः शान्तिं सुसमृद्धिं च परामाप्तुमर्हतीति।

**सन्दर्भ सूची**


1. मनुस्मृतिः – 2/18
2. गूगल विकिपीडिया
3. संस्कृतनिबन्धशतकम्, पृ.– 25
4. मनुस्मृतिः – 1/55
5. विदुरनीतिः – 1/4
6. तैत्तिरीयोपनिषद् (शिक्षावल्ली)– 1/11/1
7. हितोपदेशः – 1/14
8. अभिाानशाकुन्तलम् – 4/18
9. शान्तिपाठ विकिपीडिया
10. शुक्लयजुर्वेदः – 40/6–7
11. ऋग्वेदः – 10/125/3
12. शुक्लयजुर्वेदः – 9/23
13. अथर्ववेदः – 12/1/12
14. वाल्मीकि रामायणम् (युद्धकाण्डम्) – 15
15. मनुस्मृतिः – 2/20
16. हितोपदेशः – 1/69
17. ऋग्वेदः – 10/191/2–4
18. विष्णुपुराणम् – 2/3/1
19. वायुपुराणम् – 2/3/1
20. मनुस्मृतिः – 2/22
21. बृहस्पति आगमः – 1/17
22. मनुस्मृतिः – 6/92